देयमित्याह । ऋणं लेख्यकृतन्देयं पुरुषैस्त्रिभिरेव तु । यथा साक्ष्यादिकृतमृणं त्रिभिरेव देयं तथा लेख्यकृतमप्याहर्त्तृपुत्त्रतत्पुत्त्रैस्त्रिभिरेव देयम् । न चतुर्थादिभिरिति नियम्यते । ननु पुत्त्रपौत्त्रैर्ऋणन्देयमित्यविशेषेणर्णमात्रन्त्रिभिरेव देयमिति नियतमेव । बाढ़मस्यैवोत्सर्गस्य पत्त्रारूढ़र्णविषये स्मृत्यन्तरप्रभवामपवादशङ्कामपनेतुमिदं वचनमारब्धम् । तथा हि । पत्त्रलक्षणमभिधाय कात्यायनेनाभिहितम् । एवं कालमतिक्रान्तं पितॄणान्दाप्यते ऋणमिति । इत्थं पत्त्रारूढ़मतिक्रान्तकालमपि पितॄणामपि पितॄणां सम्बन्धि दाप्यते । अत्र पितॄणामिति बहुवचननिर्द्देशात् कालमतिक्रान्तमिति वचनाच्चतुर्थादिर्दाप्यत इति प्रतीयते । तथा हारीतेनापि । लेख्यं यस्य भवेद्धस्ते लाभन्तस्य विनिर्द्दिशेदिति । अत्रापि यस्य हस्ते पत्त्रमस्ति तस्यर्णलाभ इति सामान्येन चतुर्थादिभ्योऽप्यर्णलाभोऽस्तीति प्रतीयते । अनयोस्तदाशङ्कानिवृत्त्यर्थं एतद्वचनमिति युक्तम् । वचनद्वयन्तु योगीश्वरवचनानुसारेण योजनीयम् ॥ * ॥ अस्यापवादमाह । आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते । सबन्धकेऽपि पत्त्रारूढ़े ऋणे त्रिभिरेव देयमिति नियमाद्धनग्राहकरणानधिकारेणाध्याहरणेऽप्यनधिकारं प्राप्ताविदमुच्यते । यावच्चतुर्थेन पञ्चमेन वा ऋणं न दीयते तावदेवाधिर्भुज्यत इति वदता सबन्धकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शितः । नन्वेतदप्ययुक्तमेव फलभोग्यो न नश्यतीति सत्यम् । तदप्येतस्मिन्न सत्यपवादवचने पुरुषत्रयविषयमेव स्यादिति सर्व्वमनवद्यम् ॥ * ॥ प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसरति ।

"देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा ।
भिन्ने दग्धेऽथवा च्छिन्ने लेख्यमन्यत्तु कारयेत् ॥"

व्यवहाराश्रमे पत्त्रे पत्त्रान्तरं कुर्य्यादिति विधीयते । व्यवहाराश्रयत्वाच्चात्यन्तव्यवहितदेशान्तरस्थे पत्त्रे दुर्लेख्ये दुष्टानि सन्दिह्यमानानि अवाचकानि वा लेख्यानि लिप्यक्षराणि पदानि वा यस्मिंस्तद्दुर्लेख्यं तस्मिन्दुर्लेख्ये नष्टे कालवशेन उन्मृष्टे मसीदौर्ब्बल्यादिना म्रदिते लिप्यक्षरे हृते तस्करादिभिर्भिन्ने विदलिते दग्धे वह्निना छिन्ने द्विधा भूते सति द्विर्भवति । एतच्चार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्यां विमत्यान्तु व्यवहाराप्राप्तौ देशान्तरस्थपत्त्रानयनाध्वानापेक्षया कालो दातव्यः दुर्द्देशावस्थिते नष्टे वा पत्त्रे साक्षिभिरेव व्यवहारनिर्णयः कार्य्यः । यथाह नारदः ।

"लेख्ये देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते ।
सतस्तत्कालकरणमसतो द्रष्टृदर्शनम् ॥" इति ।

सतो विद्यमानपत्त्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः । असतः पुनरविद्यमानस्य पत्त्रस्य पूर्व्वं ये द्रष्टारः साक्षिणस्तैर्दर्शनं व्यवहारपरिसमापनं कार्य्यम् । यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्य्यः अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्द्दिशेदिति स्मरणात् । एतच्च जानपदं व्यवस्थापत्त्रम् । राजकीयमपि व्यवस्थापत्त्रमीदृशमेव भवति । इयांस्तु विशेषः ।

"राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितन्तथा ।
राजकीयं स्मृतं लेख्यं सर्व्वेष्वर्थेषु साक्षिमत् ॥"
इति ॥ * ॥

तथान्यदपि राजकीयं जयपत्त्रं वृहद्वशिष्ठेनोक्तम् ।

यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियम् ।
सावधारणकञ्चैव जयपत्त्रकमिष्यते ॥
प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया ।
सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्त्रकमिति ॥

तथा । सभासदोऽपि मतं मेऽमुकपुत्त्रस्येति स्वहस्तं दद्युः ।

"सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः ।
यथा लेख्यविधौ तद्वत् स्वहस्तं दद्युरेव ते ॥"
इति मनुस्मरणात् ।

सभासदाञ्च परस्परानुमतिव्यतिरेकेण व्यवहारो निःशल्यो भवति । यथाह नारदः ।

"यत्र सभ्यो जनः सर्व्वः साध्विति तदिति मन्यते ।
स निःशल्यो विवादः स्यात् सशल्यस्त्वन्यथा
भवेत् ॥" इति ।

एतच्चतुष्पाद्व्यवहार एव ।

"शोधयेत् साध्यमर्थं यच्चतुष्पादान्वितञ्च यत् ।
राजमुद्राङ्कितञ्चैव जयपत्त्रकमिष्यते ॥"
इति स्मरणात् ।

यत्र तु हीनता यथा ।

"अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥"
इति ।

तत्र न जयपत्त्रमस्ति अपि तु हीनपत्त्रमेव तच्च कालान्तरे दण्डप्राप्त्यर्थं जयपत्त्रं तु प्राङ्न्यायविधिसिद्ध्यर्थमिति विशेषः । लेख्यसन्देहे निर्णयनिमित्तान्याह ।

"सन्दिग्धलेख्यशुद्धिः स्यात् स्वहस्तलिखितादिभिः ।
युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः ॥"

शुद्धमशुद्धञ्चेति सन्दिग्धस्य लेख्यस्य शुद्धिः स्वहस्तलिखितादिभिः स्यात् । स्वहस्तेन लिखितं यल्लेख्यान्तरन्तेन शुद्धिः । यदि सदृशान्यक्षराणि भवन्ति तदा शुद्धिः स्यादित्यर्थः । आदिशब्दात् साक्षिलेखकस्वहस्तलिखितान्तरसम्वादाच्छुद्धिरिति । युक्त्या प्राप्तिर्युक्तिप्राप्तिः । देशकालपुरुषाणां द्रव्येण सह सम्बन्धः प्राप्तिः । अस्मिन्देशे अस्मिन् काले अस्य पुरुषस्येदं द्रव्यं घटत इति युक्तिः । प्राप्तिः क्रिया तत्साक्ष्युपन्यासः । चिह्नमसाधारणं श्रीकारादि । सम्बन्धः अर्थिप्रत्यर्थिनोः पूर्व्वमपि परस्परविश्वासेन दानग्रहणादिसम्बन्धः । आगमोऽस्यैतावतोऽर्थस्य सम्भावितः प्राप्त्युपायः । एत एव हेतवः । एभिर्हेतुभिः सन्दिग्धलेख्यशुद्धिः स्यादित्यन्वयः । यदा तु लेख्ये सन्देहनिर्णयो न जायते तदा साक्षिभिर्निर्णयः कार्य्यः । यथाह कात्यायनः ।

"दूषिते पत्त्रके वादी तदारूढ़ांस्तु निर्द्दिशेत् ॥"
इति ।

साक्षिसम्भवविषयमिदं वचनम् । साक्ष्यसम्भवविषयन्तु हारीतवचनम् ।

"न मयैतत् कृतं पत्त्रं कूटमेतेन कारितम् ।
अधरीकृत्य तत् पत्त्रमथ दिव्येन निर्णयः ॥"
इति ॥ * ॥

एवं शोधिते पत्त्रे ऋणे च दातव्ये प्राप्ते यदा कृत्स्नमेवर्णन्दातुमसमर्थस्तदा किं कर्त्तव्यमित्यत आह ।

"लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वर्णिको धनम् ।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम् ॥"

यदाधमर्णिकः सकलमृणं दातुमसमर्थस्तदा शक्त्यनुसारेण दत्त्वा दत्त्वा पूर्व्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेदेतावन्मया दत्तमिति । उत्तमर्णो वा उपगतं प्राप्तं धनन्तस्यैव लेख्यस्य पृष्ठे दद्यादभिलिखेदेतावन्मया लब्धमिति । कथं स्वहस्तपरिचिह्नितम् । स्वहस्तलिखिताक्षरचिह्नितम् । यद्वोपगतं प्रवेशपत्त्रं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णो दद्यात् ॥ * ॥ ऋणे तु कृत्स्ने दत्ते लेख्यं किं कर्त्तव्यमित्यत आह ।

"दत्त्वर्णं पाटयेल्लेख्यं शुद्धौ चान्यत्तु कारयेत् ।"

क्रमेण सकृदेव वा कृत्स्नमृणन्दत्त्वा पूर्व्वकृतं लेख्यम्पाटयेत् । यदा तु दुर्गदेशावस्थितं लेख्यं नष्टं वा तदा शुद्ध्यै अधमर्णत्वनिवृत्त्यर्थमन्यल्लेख्यं कारयेदुत्तमर्णमधमर्णः पूर्व्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्त्रं अधमर्णाय दद्यादित्यर्थः ॥ * ॥ ससाक्षिके ऋणे कृत्स्ने दातव्ये किं कर्त्तव्यमित्यत आह ।

"साक्षिमच्च भवेत् यद्वा तद्दातव्यं ससाक्षिकम् ।"

यत्तु ससाक्षिकमृणन्तत् पूर्व्वसाक्षिसमक्षमेव दद्यात् । इति लेख्यप्रकरणम् । इति मिताक्षरायां व्यवहाराध्यायः ॥

लेख्यचूर्णिका, स्त्री, (लेख्यस्य चूर्णिका ।) तूलिका इति शब्दरत्नावली ॥

लेख्यपत्त्रः, पुं, (लेख्यं लेखार्हं पत्त्रं यस्य ।) तालवृक्षः । इति भावप्रकाशः ॥ लेखनीयपत्त्रे, क्ली ॥

लेख्यस्थानं, क्ली, (लेख्यस्य स्थानम् ।) लिख्यते यत्र । आफिस इति दप्तरखाना इति च म्लेच्छभाषा । तत्पर्य्यायः । गञ्जकुटी २ । इति शब्दरत्नावली ।

लेडं, क्ली, गूथम् । न्याड़ इति भाषा । यथा,—
" उत्ससर्ज्ज ह्रदस्लेडं मूत्रञ्च भयमाप च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे धेनुकासुरवधे २२ अध्यायः ॥

लेप, ऋ ङ गमने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अलिलेपत् । ङ, लेपते लिलेपे । इति दुर्गादासः ॥

लेपः, पुं, (लिप + घञ् ।) लेपनम् । (यथा, मार्कण्डेये । ३५ । १५ ।